# शारदा संस्कृतम्

## 7

### अखिल-ब्रह्माण्डे संस्कृतम्

# शारदा संस्कृतम्

## भाग - 7

## ( कक्षा सप्तमी )

### लेखक-मण्डल


**जगन्नाथ शर्मा**
अध्यक्ष - ग्रामीण शिक्षा विकास समिति, हरियाणा

**उपेन्द्र कुमार शास्त्री**
प्रधानाचार्य एवं शिक्षा प्रमुख, दिल्ली
उत्तरक्षेत्र संस्कृत संयोजक

**नारायण सिंह**
प्रधानाचार्य, गीता निकेतन आ॰ वि॰, कुरुक्षेत्र
हरियाणा प्रांत संस्कृत संयोजक

**नरेन्द्र पाल**
आचार्य, ल॰ म॰ स॰ बा॰ मं॰ वसन्त विहार
दिल्ली प्रांत संस्कृत संयोजक

**तिरिवीधि साम्ब शिव राव**
आचार्य, स॰ ध॰ स॰ बा॰ मन्दिर,
पंजाबी बाग, दिल्ली

**विकास शर्मा**
आचार्य, गीता निकेतन आवासीय
विद्यालय, कुरुक्षेत्र

**सुरेन्द्र कुमार**
आचार्य, गीता निकेतन आवासीय
विद्यालय, कुरुक्षेत्र

**भूपेन्द्र शर्मा**
आचार्य, गीता निकेतन आवासीय
विद्यालय, कुरुक्षेत्र

**डॉ॰ अमित धीमान**
आचार्य, गीता निकेतन आवासीय
विद्यालय, कुरुक्षेत्र

**ज्योति प्रसाद**
आचार्य, गीता निकेतन आवासीय
विद्यालय, कुरुक्षेत्र



**विद्या भारती उत्तर क्षेत्र**
नारायण भवन, गीता निकेतन परिसर, कुरुक्षेत्र -136118
दूरभाष : 01744-259941 E-mail : vbukkkr@yahoo.co.in

# प्राक्कथनम्

संसारस्य प्राचीनतमा, श्रेष्ठा, वैज्ञानिकी भाषा संस्कृतम् अनेकासां भाषाणां जननी अस्ति। सङ्गणकस्य कृते सर्वाधिका उपयुक्ता भाषा नूनमेव संस्कृतम्। आधुनिके युगे भविष्यस्य नवमसन्ततेः सङ्गणकस्य (9th generation computer) उत्पादनं संस्कृताधारितम् एव भविष्यति। अत एव वयं वक्तुं शक्नुमः यत् एषा भाषा न केवलं प्राचीनतमा भाषा अपितु आधुनिकी भाषापि अस्ति। उच्यते हि सम्प्रति यत् **'संस्कृतं पठ, आधुनिको भव।'**

एकस्याः आख्यायाः अनुसारेण संस्कृतस्य प्रत्यक्षः अप्रत्यक्षश्च प्रभावः अखिलविश्वस्य प्रायः 97% भाषासु वर्तते। उपर्युक्तकथनेन स्पष्टमेव यत् एषा भाषा सार्वदेशिकी भाषा। पुनः एषा भाषा जनभाषा भवतु, एतस्य कृते मिलित्वा प्रयत्नं कुर्मो वयम्।

बुद्धेः विकासाय संस्कृतमावश्यकम्। विद्या भारती एतां भाषाम् आधारभूतविषयरूपेण मानयति। अस्माकं विद्यालयेषु द्वितीया-कक्षातः संस्कृतस्य अध्यापनं प्रारभते। अस्य कृते बहुभ्यः दिनेभ्यः प्रयासः प्रचलति स्म यत् उत्तरक्षेत्रस्य संस्कृतस्यापि स्वपुस्तकं भवेत्। अस्मिन्नेव क्रमे गतवर्षे द्वितीयातः पञ्चमीकक्षा-पर्यन्तं संस्कृतपाठ्यपुस्तकानां लेखनम् अभवत्। सम्प्रति षष्ठीतः अष्टमीकक्षा-पर्यन्तं संस्कृतपाठ्यपुस्तकानि भवतां सुधीजनानां पुरतः वर्तन्ते।

कस्याः अपि भाषायाः चत्वारि कौशलानि वर्तन्ते - श्रवणम्, भाषणम्, पठनं लेखनञ्च। अतः चतुर्णां कौशलानां विकासाय अस्माकं सर्वं कार्यं भवेत्। कक्षायां बहुविध-शिक्षणोपकरणानां सहायताभिः अध्यापनं भवेत्। कक्षासु प्रत्यक्षविधिना, विभिन्नवस्तूनां प्रदर्शनमाध्यमेन, स्फोरक-पत्राणाम् उपयोगेन, प्रश्नोत्तर-माध्यमेन, वार्तालापैः, सम्भाषणमाध्यमेन निरन्तरम् अध्यापनं भवेत्, येन छात्राः संस्कृतसम्भाषणे दक्षाः भवेयुः। अपि च कक्षासु अध्यापनं गतिविध्याधारितं छात्रकेन्द्रितञ्च भवेत् । आचार्यः प्रत्येकं पाठस्य स्वसुविधानुसारेण 'पॉवर पॉईंट' प्रदर्शनस्य (PPT) स्तरानुसारं सम्यग्रूपेण निर्माणं कृत्वा अध्यापनं कारयेत् ।

समये-समये संस्कृतवस्तु-प्रदर्शनी, सज्जपट्टे संस्कृतलेख-प्रदर्शनम्, कक्षाकार्यप्रदर्शनाय समुचिता व्यवस्था, भित्तिलेखः, सम्भाषणप्रतियोगिता, संस्कृतगीतगायनम्, श्लोकगायनम्, सुभाषितलेखन-प्रतियोगिता, संस्कृतसुलेख-प्रतियोगिता, सम्भाषण-प्रतियोगिता, गीतापाठ-प्रतियोगिता, प्रश्नमञ्च-प्रतियोगिता चादयः स्वव्यवस्थानुसारम् अवश्यमेव कारणीयाः। विद्यालये संस्कृतमय-वातावरणस्य निर्माणार्थं संस्कृताचार्यैः सदैव प्रयत्नो विधेयः।

बहुविधप्रयासेन संस्कृतं संस्कृतमाध्यमेन अध्यापनार्थं सम्भाषणाधारेण सरलभाषया च प्रस्तुतमिदं पुस्तकं भवतां सम्मुखम् अस्ति। षष्ठीतः अष्टमीपर्यन्तं संस्कृत-पुस्तकस्य कृते क्षेत्रस्य एषः प्रथमः प्रयासः अस्ति। अत एव त्रुटेः सम्भावना तु वर्तते एव। भवादृशान् सुधीजनान् निवेदयामः यत् आगामि-संस्करणस्य कृते प्रस्तुतपुस्तक-विषयकस्वविचारान् प्रेषयन्तु भवन्तः। भवतां सुधीजनानां विचाराः नूनमेव आगामिसंस्करणस्य कृते उपयोगिनः भविष्यन्ति।

पुस्तकनिर्माणे विद्याभारत्याः अधिकारिणां महत् योगदानं प्राप्तम्। तथैव सुन्दरचित्राणां द्वारा पुस्तकस्य आकर्षणं वर्धितवन्तौ गीतानिकेतनविद्यालयस्य कलाचार्यौ नितेशकुमारः सुरेन्द्रसिंहः च। पुस्तकस्य सर्वं टङ्कणकार्यं महता हर्षेण कृतवान् सत्येन्द्रः। एतेभ्यः सर्वेभ्यः सादरं कृतज्ञताम् अर्पयामि।

**शृणुत संस्कृतम् ! वदत संस्कृतम् !! पठत संस्कृतम् !!! लिखत संस्कृतम् !!!!**
**लसतु च संस्कृतं गृहे-गृहे च पुनरपि।**
**जयतु संस्कृतम्। जयतु भारतम्**

**विदुषां पदकिङ्करः**
**उपेन्द्र-कुमार-शास्त्री**
**उत्तरक्षेत्र-संस्कृत-संयोजकः**

# अनुक्रमणिका


| | | | |
|---|---|---|---|
| | | मङ्गलाचरणम् | 04 |
| 01. | प्रथमः पाठः | सुभाषितामृतम् | 05 |
| 02. | द्वितीयः पाठः | भक्तिर्फलति भावेन | 08 |
| 03. | तृतीयः पाठः | श्रद्धावान् लभते ज्ञानम् | 11 |
| 04. | चतुर्थः पाठः | ए॰ पी॰ जे॰ अब्दुलकलामः | 14 |
| 05. | पञ्चमः पाठः | षड् ऋतवः | 17 |
| 06. | षष्ठः पाठः | दूरभाषेण वार्तालापः | 20 |
| 07. | सप्तमः पाठः | सुभाषचन्द्रः | 24 |
| 08. | अष्टमः पाठः | प्रदूषणम् | 27 |
| 09. | नवमः पाठः | भूषणैः किं प्रयोजनम् | 30 |
| 10. | दशमः पाठः | तडागस्य आत्मकथा | 33 |
| 11. | एकादशः पाठः | भारतीयाः गणितज्ञाः | 37 |
| 12. | द्वादशः पाठः | अपरीक्ष्य न कर्त्तव्यम् | 40 |
| 13. | त्रयोदशः पाठः | सूक्तयः | 43 |
| 14. | चतुर्दशः पाठः | रचयेम संस्कृतभवनम् ( केवलं गानाय ) | 44 |
| | | परिशिष्टम् | 45 |

# मङ्गलाचरणम्



**ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।**
**तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम् ॥**

जड़-चेतन प्राणियों वाली यह सम्पूर्ण सृष्टि परमपिता परमेश्वर द्वारा व्याप्त है, आच्छादित है । अतः ईश्वर की सर्व-व्यापकता को ध्यान में रखते हुए मनुष्य को सांसारिक पदार्थों का उपयोग (भोग) त्यागपूर्वक करना चाहिए, लालच रहित रहकर 'यह मेरा नहीं है', इस भाव को मन में रखते हुए वस्तुओं का संग्रह नहीं करना चाहिए ।

**यां मेधां देवगणाः पितरश्चोपासते ।**
**तया मामद्य मेधयाग्ने मेधाविनं कुरु ॥**

हे ज्ञानस्वरूप अग्ने ! प्रकाशस्वरूप परमेश्वर! जिस मेधा (धारणावती) बुद्धि की देवगण अर्थात् विद्वान् लोग उपासना करते थे, जिस बुद्धि की उपासना ऋषि मुनि और हमारे पूर्वज करते थे, आप उसी बुद्धि से हमें भी बुद्धिमान कीजिए ।

प्रथमः पाठः

# सुभाषितामृतम्

पुस्तकस्था तु या विद्या, परहस्तगतं धनम्।
कार्यकाले समुत्पन्ने, न सा विद्या न तद्धनम् ॥ 1 ॥

आलस्यं हि मनुष्याणां, शरीरस्थो महारिपुः।
नास्त्युद्यमसमो बन्धुः, कृत्वायं नावसीदति ॥ 2 ॥

यथा चित्तं तथा वाचो, यथा वाचस्तथा क्रिया ।
चित्ते वाचि क्रियायां च, साधूनामेकरूपता ॥ 3 ॥

दृष्टिपूतं न्यसेत्पादं, वस्त्रपूतं जलं पिबेत् ।
सत्यपूतां वदेद्वाचं, मनः पूतं समाचरेत् ॥ 4 ॥

कीटोऽपि सुमनः सङ्गाद्, आरोहति सतां शिरः ।
अश्मापि याति देवत्वं, महद्भिः सुप्रतिष्ठितम् ॥ 5 ॥

जलबिन्दुनिपातेन, क्रमशः पूर्यते घटः ।
सः हेतुः सर्वविद्यानां, धर्मस्य च धनस्य च ॥ 6 ॥

**पदच्छेदः** – तद्धनम् – तत् + धनम्, नास्त्युद्यमसमो – न + अस्ति + उद्यमसमः, कृत्वायं – कृत्वा + अयम्, वाचस्तथा – वाचः + तथा, साधूनामेकरूपता – साधूनाम् + एकरूपता, न्यसेत्पादं – न्यसेत् + पादम्, कीटोऽपि – कीटः + अपि, अश्मापि – अश्मा + अपि।

**शब्दार्थाः** – **पुस्तकस्था** – पुस्तक में स्थित, **परहस्तगतं** – दूसरे के हाथ में गया हुआ, **कार्यकाले** – कार्य के समय, **समुत्पन्ने** – उत्पन्न होने पर (आने पर), **महारिपुः** – बड़ा शत्रु, **सत्यपूतां** – सत्य से पवित्र (युक्त), **मनःपूतं** – मन से पवित्र (सोच विचार कर), **अश्मा** – पत्थर, **कीटः** – कीड़ा, **उद्यमसमः** – परिश्रम के समान, **सुमनः सङ्गात्** – फूलों के संग से, **आरोहति** – चढ़ता है, **महद्भिः** – महान् लोगों के द्वारा, **निपातेन** – गिरने से, **सुप्रतिष्ठितम्** – अच्छी प्रकार स्थापित किया हुआ, **पूर्यते** – भरता है।

**आचार्याय** – श्लोकोच्चारणस्य स्पर्धां कारयतु। सुगीतानां श्लोकानां स्तोत्राणां च वीडियो प्रदर्शनीयम्।

## अभ्यासकार्याणि

1. **पाठस्य सुभाषितानि सस्वरं गायत स्मरत च –**

2. **एकपदेन उत्तराणि लिखत –**

(क) मनुष्याणां शरीरस्थः रिपुः कः ? ..............................................

(ख) कीदृशं जलं पिबेत् ? ..............................................

(ग) कीदृशं वाचं वदेत् ? ..............................................

(घ) केन समं बन्धुः नास्ति ? ..............................................

(ङ) कीदृशं धनं, धनं न भवति ? ..............................................

3. **पूर्णवाक्येन उत्तराणि लिखत –**

(क) कीदृशी विद्या कार्यकाले समुत्पन्ने विद्या न भवति ?

..........................................................................................................................

(ख) कीटः कस्मात् सतां शिरः आरोहति ?

..........................................................................................................................

(ग) घटः कथं पूर्यते ?

..........................................................................................................................

(घ) कः देवत्वं याति ?

..........................................................................................................................

(ङ) चित्ते वाचि क्रियायां च केषाम् एकरूपता भवति ?

..........................................................................................................................

4. **अधोलिखितानां शुद्ध-कथनानां समक्षम् 'आम्' अशुद्धानां च समक्षं 'न' इति लिखत –**

(क) आलस्यं महारिपुः अस्ति । (..........................)

(ख) तपःपूतं जलं पिबेत् । (..........................)

(ग) कीटः सुमनःसङ्गात् सतां शिरः आरोहति । (..........................)

(घ) जलबिन्दुनिपातेन घटः न पूर्यते । (..........................)

(ङ) परहस्तगतं धनं कार्यकाले धनं न भवति । (..........................)

5. **समभावं श्लोकं लिखत –**

(क) सत्सङ्गतिः उन्नतिकारिका भवति ।

............................................................................................................ ।

............................................................................................................ ॥

(ख) सर्वं सुविचारपूर्वकम् आचरणं करणीयम् ।

........................................................................................ ।

........................................................................................ ।।

(ग) आलस्यं हानिकारकम् उद्यमः लाभदायकः भवति ।

........................................................................................ ।

........................................................................................ ।।

(घ) विद्या, धनं धर्मः च शनैः शनैः वर्धन्ते ।

........................................................................................ ।

........................................................................................ ।।

## 6. श्लोकांशान् परस्परं मेलयत -

| | | |
|---|---|---|
| (क) आलस्यं हि मनुष्याणां | (i) क्रमशः पूर्यते घटः। | .............................................. |
| (ख) अश्मापि याति देवत्वं | (ii) साधूनाम् एकरूपता। | .............................................. |
| (ग) जलबिन्दुनिपातेन | (iii) मनःपूतं समाचरेत्। | .............................................. |
| (घ) चित्ते वाचि क्रियायां च | (iv) शरीरस्थो महारिपुः। | .............................................. |
| (ङ) सत्यपूतां वदेत् वाचं | (v) महद्भिः सुप्रतिष्ठितम्। | .............................................. |

## 7. समानार्थक-पदैः सह मेलयत -

| | | | |
|---|---|---|---|
| (क) जलं | (i) श्रमः | .......................... | .......................... |
| (ख) घटः | (ii) वारि | .......................... | .......................... |
| (ग) उद्यमः | (iii) साधूनाम् | .......................... | .......................... |
| (घ) धनम् | (iv) कुम्भम् | .......................... | .......................... |
| (ङ) सताम् | (v) पतनेन | .......................... | .......................... |
| (च) निपातेन | (vi) वित्तम् | .......................... | .......................... |

## 8. अधोलिखितपदानां समक्षं पाठे प्रयुक्तपर्यायपदानि लिखत -

| | | | |
|---|---|---|---|
| (क) वाणी | = .................................. | (ग) पुष्पम् | = .................................. |
| (ख) हृदये | = .................................. | (घ) पाषाणः | = .................................. |

द्वितीयः पाठः

# भक्तिर्फलति भावेन

## ( प्रथमं दृश्यम् )

**( तपोवनस्य दृश्यम्, कुटीरे मतङ्गऋषिः उपविष्टः अस्ति। तदैव तस्य शिष्या शबरी प्रविशति। )**

शबरी – गुरुदेव ! प्रणमामि।

मतङ्गऋषिः – स्वस्ति तुभ्यम्।

शबरी – अनुगृहीता भगवन्।

मतङ्गऋषिः – हे शबरि ! अद्य त्वं बहु खिन्ना असि ? किं कारणं खिन्नतायाः?

शबरी – सत्यं कथयसि भगवन्। अद्य मम मनः उद्विग्नम् अस्ति।



मतङ्गऋषिः – किमर्थम् ?

शबरी – गुरुवर ! सर्वैः उपेक्षिता अहम् ।

मतङ्गऋषिः – चिन्ता मास्तु। श्रीरामः अस्माकम् आश्रयः । सः एव सर्वेषां स्वामी।

शबरी – जानामि, किन्तु बहुकालात् प्रतीक्षारता। अद्यावधि रामः न आगतः । एवं विचार्य एव अहं दुःखिता अस्मि।

मतङ्गऋषिः – अलं चिन्तया। शुद्धभावेन सततं स्मरणं करोतु। एकस्मिन् दिने सः अवश्यमेव आगमिष्यति।

शबरी – धन्यवादः । इदानीं मम चिन्ता समाप्ता। अहम् अहर्निशं निर्मलमनसा भक्तिभावेन श्रीरामस्य ध्यानं करिष्यामि तस्य आगमनस्य च आजीवनं प्रतीक्षां करिष्यामि।

मतङ्गऋषिः – शीघ्रमेव भवत्याः मनोकामना पूर्णा भविष्यति । यतो हि '**भक्तिर्फलति भावेन न तु प्रपञ्चेन।**'

## ( द्वितीयं दृश्यम् )

**( गुरोः मतङ्गस्य दिव्यलोकं गमनानन्तरं, शबरी निरन्तरं भक्त्या प्रभोः श्रीरामस्य प्रतिदिनं प्रतीक्षां करोति। एकस्मिन् दिने रामः लक्ष्मणेन सह आश्रमम् आगच्छति। )**

शबरी – (शनैः शनैः गायति।) हे राम ! हे राम ! आयाहि रे ! आयाहि रे ! निजदर्शनैः मम जीवनं संरक्षय । श्रीराम ! श्रीराम ! श्रीराम ! आयाहि रे ! (सलक्ष्मणः श्रीरामः प्रविशति।)

लक्ष्मणः – भ्रातः ! अति पवित्रम् इदं तपोवनम्।



रामः – सत्यं वदति अनुज लक्ष्मण ! अत्र माता शबरी माम् प्रतीक्षते।

शबरी – (कर्णं दत्त्वा) कुतः अयं विशिष्टः ध्वनिः ? अग्रे गच्छति।

लक्ष्मणः – (शबरीं दृष्ट्वा) किम् एषा एव शबरी माता।
(शबरी लगुडसाहाय्येन आगत्य रामस्य चरणयोः पतति।)

श्रीराम: – मात: ! मैवं-मैवम्।

(शबरी रामं कुटीरं नयति, आसने उपवेशयति । समीपे एव लक्ष्मण: उपविशति । सा कण्डुलात् फलं निष्कास्य एकम् एकं बदरीफलं च उच्छिष्टं कृत्वा यत् मधुरं तत् फलं रामाय ददाति।)

शबरी – प्रभो ! मधुरं बदरीफलम् इदं खादतु कृपया ।

राम: – (आस्वाद्य) अमृततुल्यं स्वादिष्टं फलम् ।

शबरी – अद्य मे जीवितं सफलं जातम् । भवत: दर्शनै: मम नेत्रे आत्मा च तृप्ता: जाता: ।

श्रीराम: – भवत्या: श्रद्धया भक्त्या च प्रीतोऽहम्, तव भाव-प्रधाना भक्ति: लोके चिरं स्थास्यति ।

शबरी – धन्याहम् । मम जीवनं धन्यम्, मम साधना सफला जाता।

**( पटाक्षेप: भवति )**

**शब्दार्था:** – **अद्यावधि** – आज तक, **विचार्य** – विचार करके, **प्रतीक्षते** – प्रतीक्षा करती है, **उद्विग्नं** – दु:खी, **लगुडसाहाय्येन** – डंडे की सहायता से, **कण्डुलात्** – टोकरी से, **खिन्ना** – उदास, **गमनानन्तरं** – जाने के बाद, **निर्मलमनसा** – पवित्र मन से, **उपेक्षिता** – अनदेखा करना, **प्रपञ्चेन** – छल से, **अलं चिन्तया** – चिन्ता मत करो, **उपवेशयति** – बिठाती है, **नयति** – ले जाता है, **मे** – मेरा, **जीवितं** – जीवन, **चिरं** – अधिक काल, **उच्छिष्टं** – जूठा।

आचार्याय – **रामायणम् अधिकृत्य संस्कृतभाषायां लघु-लघु संवादं नाटकं च सज्जीकृत्य विशेषावसरेषु प्रस्तुतिं कारयतु। रामायणस्य सर्वेषां पात्राणां सचित्रं "पी॰ पी॰ टी॰" इति निर्मीय संस्कृतेन परिचयं कारयतु। अतिथि-स्वागतसम्भाषणं सज्जीकारयतु।**

## अभ्यासकार्याणि

1. **पाठस्य साभिनयं वाचनं कुरुत ।**
2. **एकपदेन उत्तराणि लिखत –**

(क) मतङ्गस्य शिष्या का अस्ति ? ....................

(ख) रामेण सह तपोवनं क: गच्छति ? ....................

(ग) शबरी कस्य प्रतीक्षां करोति ? ....................

(घ) शबरी रामाय किं फलं यच्छति ? ....................

3. **पूर्णवाक्येन उत्तराणि लिखत –**

(क) शबरी किमर्थं खिन्ना अस्ति ?

....................

(ख) भक्ति: केन फलति ?

....................

(ग) शबरी कुत्र रामस्य प्रतीक्षां करोति ?

....................

(घ) तपोवनं कीदृशम् अस्ति ?

........................................................................................................

**4. घटना क्रमानुसारेण वाक्यानि लिखत –**

(क) शबरी रामाय बदरीफलानि यच्छति। ..............................................................

(ख) मतङ्गऋषिः शबरीम् उपदिशति। ..............................................................

(ग) शबरी भक्त्या रामस्य प्रतीक्षां करोति। ..............................................................

(घ) शबरी चिन्ता मुक्ता भवति। ..............................................................

(ङ) श्रीरामः लक्ष्मणः च तपोवनम् आगच्छतः। ..............................................................

**5. मञ्जूषातः विलोमपदानि चित्वा रिक्तस्थाने लिखत –**

**मञ्जूषा – प्रसन्ना, शीघ्रम्, विस्मरणम्, विफलम्, असत्यम्, दूरे**

(क) स्मरणम् ........................ (ख) सफलम् ........................

(ग) खिन्ना ........................ (घ) सत्यम् ........................

(ङ) शनैः ........................ (च) समीपे ........................

**6. स्थूलपदानि आधृत्य प्रश्ननिर्माणं कुरुत –**

(क) **श्रीरामः** अस्माकम् आश्रयः। ..............................................................

(ख) **पवित्रम्** इदं तपोवनम्। ..............................................................

(ग) एषा **शबरी माता** अस्ति। ..............................................................

(घ) **भावप्रधाना** भक्तिः चिरं स्थास्यति। ..............................................................

(ङ) शबरी **रामं** कुटीरं नयति। ..............................................................

**7. द्रोणीतः अव्ययपदानि चित्वा स्थालिकायां स्थापयत –**




